साहित्य संहिता

Available at http://www.sahityasamhita.org/

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

# भारतीयसंस्कृतेः परिवर्तितं स्वरूपम्

डॉ. कृशणमोहन पाण्डेय

असिस्टेण्ट प्रोफेसर स.ध. आ. म. डोहगी, बंगाणा, ऊना, हि. प्र. 174307

मो. 9736977002, email- apkmpandey@gmail.com

.........................................................................................................................................

संस्कृतेर्दृष्ट्या वैदिकी संस्कृतिः सर्वप्राचीना सर्वोत्कृष्टा च नास्त्यत्र काचिदपि विचिकित्सा। चिन्तनीयमिदमस्माक– मादिकालिकसंस्कृतेः स्वरूपम्। ऋषयः जडचेतनब्रह्मरहस्यज्ञाः साक्षात्कृतधर्माणः सर्वत्रात्मानमेवानुभवन्ति। यत्र विश्वं भवत्येकनीडम्। परैः सार्द्धं वृत्तिः स्वसदृशी। एतादृशी जीवनशैली जीवनस्याधारभूता अस्माकं भारतीयासंस्कृतिः। सर्वत्र मधुमयं वातावरणं तेषां पूर्वजानां चिन्तनम्। मन्त्रयति मन्त्रद्रष्टा ऋषिः–

**मधुमन्मे निक्रमणं मधुमन्मे परायणम्।**

**वाचा वदामि मधुमत् भूयासं मधुसंदृशः।।**[1]

मम गतिः मधुमयी स्यात्। मम गमनागमनं मधुमयं स्यात्। मुखेन यत्किमपि वचनमुच्चरेत् तत् सुमधुरं भवेत्। सर्वं सर्वत्र मधुसदृशमेव स्यात्। कियत् महनीयमिदं चिन्तनं सर्वत्र एकैव दृष्टिः सर्वे जनाः समानाः भवन्तु एषो विचार अस्माकं संस्कृतेराधारः। पश्यताम् तावत् –

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवाभागं यथापूर्वे संजानाना उपासते।।**[2]
**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**[3]

मन्त्रस्य तात्पर्यमिदं यत् हे मानवाः वो युस्माकं यत्सर्वं सामर्थ्यमस्ति तद्धर्मसम्बन्धे परस्परमविरूद्धं कृत्वा सर्वैः सुखं सदा सर्वदा संवर्धनीयमिति। वैदिकानामाचरणमस्माभिः सर्वदा स्मरणीयमाचरणीयं च। वैदिकानां विचारान् मन्त्राः ज्ञापयन्ति। तेषां मनसि ये विचाराः भवन्ति ते एव वाण्या स्फुरन्ति यत् वाण्या वदन्ति ते तदेव कर्मणा आचरन्ति। एतादृशो व्यवहारः तेषामाचारः। अतएवोक्तमाचारः परमो धर्मः। बहिरन्तश्च समानम्। द्वेषस्य कल्पना नासीत् 'मा नो द्विक्षत कश्चन' इतोऽपि उल्लिखितोऽयं मन्त्रः अथर्ववेदे–

**यन्मनसा मनुते तद्वाचा वदति।**

साहित्य संहिता

Available at http://www.sahityasamhita.org/

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

**यद्वाचा वदति तत् कर्मणा करोति।।** [4]

वैदिकाः सर्वेभ्यः सर्वदा अभयं कल्पयन्ति। संस्कृतेः संरक्षणमनेन विचारेण कुर्वन्ति। अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः। अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु।। सर्वं कल्याणमयं भवेत्। पूर्वजन्मनि यत्कृतं तच्छान्तम् भवेत् यत् कृतं यन्न कृतं यत् भूतं यच्च भाव्यं सर्वं कल्याणप्रदायकं भवतु। –

**शान्तानि पूर्व रूपाणि शान्तं नोऽस्तु कृताकृतम्।**
**शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः।**[5]

अस्माकं प्राच्याः आचारनिष्ठाः, व्यवहारे अनाचारं नैव स्वीकुर्वन्ति अनाचारस्य परिहारः नैव कल्पितः, हीनाचारः विनश्यत्येव कर्मठगुरौ दृष्टान्तो दृश्यते–

**आचारः परमो धर्मः सर्वेषामिति निश्चयः**
**हीनाचारी परीतात्मा प्रेत्यचेह विनश्यति।**
**नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणा**
**हीनाचारा श्रितं भ्रष्टं तारयन्ति कथन्चन।।**[6]

वैदिकानां पारमिकलक्ष्यनिरतानां परमरहस्यज्ञापकानां तेषां संस्कृतिः अध्यात्मयुक्ता। संस्कृतिः जीवनस्याध्यात्मिकाभियुन्नतेः प्राणः। यावत् तस्मिन्नध्यात्म वर्तते तावत् तस्य स्वरूपं स्वकीयं किन्तु आधुनिकजीवनशैल्यामिदानीं सा बाह्यशिल्पाऽऽधृता यन्त्राधीना च दृश्यते। एषा स्थितिः सांस्कृतिकाधोगमनस्यारम्भः। अध्यात्माश्रिता संस्कृतिः जीवने अत्यन्तं समृद्धं मूर्तं जीवनमुत्पादयति। समाषां विपरीतपरिस्थिनां सारल्येन समाधानं समुद्घाटयति। सर्वांगीणं विकासं प्रसारयति। परस्परं समाजे समन्वयं स्थापयति बसुधैवकुटुम्बकमिति चेतयति। वैदिकसंस्कृतिः कालक्रमेण परिवर्तिता जाता। संस्कृतेर्परिवर्तनस्येतिहासोऽपि पुराणेषु वर्णितः। परम्परया अस्माभिः कृतत्रेताद्वापरकलियुगः स्वीकृतः। सर्वविधपुराणेषु अनेनैव क्रमेण युगः स्वीकृतः। तेषु कृतयुगः सत्वगुणप्रधानः त्रेता राजस्युक्तः द्वापरः रजस्तमयुक्तः ततो कलिः तमप्रधान इतिवृत्तिश्चतुर्षु युगेषु। उक्तमपि लिंगमहापुराणे–

**सत्वं कृतं रजस्त्रेता द्वापरं च रजस्तप।**

**कलिस्तमश्च विज्ञेयं युगवृत्तिर्युगेषु च।।**[7]

चतुर्षु युगेषु लोकवृत्तिरपि भिन्ना वर्तते। यथा –

**ध्यानं परं कृतयुगे त्रेतायां यज्ञ उच्यते।**

**भजनं द्वापरे शुद्धं दानमेव कलौयुगे।**[8]

अद्यतने काले यद्यपि जनाः दानं कुर्वन्ति। मन्दिरेषु स्वनामकं पाषाणखण्डं स्थापयन्ति। स्वकीयं नाम तत्रावश्यमेव भवितव्यमिति विचिन्त्यैव दानं कुर्वन्ति। वयं न जानीमः एतादृशस्य दानस्य कियत्

फलम्। ज्यातिषज्ञाः यदा वदन्ति तदा भिक्षार्थिनां कृते दानं वितरन्ति अत्र दानं राहुकेतुग्रहाणां भयात् दानं भवति बुभुक्षया भिक्षुकानां कृते दानं प्रायः नैव कुर्वन्ति। प्रत्येकेषु युगेषु लोकधर्मनिर्माणं शास्त्रैः कृतमेव, परम्परया लोकैरनुचरितमपि। आदौ एव परम्पराज्ञापकाः शास्त्रकाराः उक्तवन्तो यत् युगक्रमेण लोकस्य धर्मपरिवर्तनमवश्यम्भावी। यथा–

**आद्ये कृतयुगे धर्मश्चतुष्पादः सनातनः।**

**त्रेतायुगे त्रिपादस्तु द्विपादो द्वापरे स्थितः।**[9]

**त्रिपादहीनस्तिष्ये तु सत्तामात्रेणाधिष्ठितः।**

**कृते तु मिथुनोत्पत्तिर्वृत्तिः साक्षाद्रसोल्लसा।।**[10]

तात्पर्यमिदं वर्तते यदारम्भे कृतयुगे त्रेतायुगे च सामान्यधर्मः सामान्यरूपेणैवालोकितः आसीत् किन्तु द्वापरे द्वेषयुक्ताः जनाः अभवन्। तत्रैव लिखितं यत्–

**द्वापरेष्वपि वर्तन्ते मतिभेदास्तदा नृणाम्।**

**मनसा कर्मणा वाचा कृच्छ्राद्वार्ता प्रसिद्धयति।**[11]

तस्मिन्नेव काले पथभ्रष्टा आगताः प्राणिनां शरीरे क्लेशः आगतः। समाजे लोभः समाविष्टः, वणिक्वृत्तिः अस्मासु समायाता। पुराणकारः त्रिकालज्ञः महान्यायावरः सर्वां स्थितिमनुभवति पुनः कथयति –

**'तदा तु सर्वभूतानां कायक्लेशवशात्क्रमात्।**

**लोभो भृतिर्वणिग्युद्धं तत्वानामविनिश्चयः।'**[12]

परम्परया क्रमेण जनाः ईर्ष्याद्वेषयुक्ताः अभवन्। पथभ्रष्टाः दृष्टाः। स्वकर्तव्यमनाचरन् गन्तुकामाः। इदानीं जनाः परोपकारं विस्मृतवन्तः। आत्मनः स्वस्य कृते एव जीवनयापनमाचरितम्। सम्पूर्णमितिहासमुक्त्वा महर्षिणा व्यासेनोक्तं यत्''

**अष्टादशपुराणेषु व्यासस्यवचनद्वयम्।**

**परोपकारः पुण्याय पापाय परपीडनम्।**

षडविधशत्रवः कामक्रोधलोभमोहमदमात्सर्यादिकाः लोके सर्वत्र लोकायिताः। कृतयुगस्यारम्भे संस्कृतेः विकृतं स्वरूपं महर्षिणा व्यासेन तस्मिन्नेव काले अनुभूतम्। सर्वमननुकूलं दृष्ट्वैव महर्षिणा

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

साहित्य संहिता

Available at http://www.sahityasamhita.org/

व्यासेन वेदानां विभाजनं कृतम्। त्रेता युगे वेद एक एव बभूव। द्वापरे वेदानां वर्गीकरणं संजातम्। तत्र लिंगपुराणे लिखितं यत्–

**वेदशाखाप्रणयनं धर्माणां संस्कारस्तथा।**

**वर्णाश्रमपरिध्वंसः कामद्वेषौ तथैव च।।**[13]

**एकोवेदश्चतुष्पादस्त्रेतास्विह विधीयते।**

**संक्षयादायुषश्चैव व्यस्येते द्वापरेषु सः।**[14]

**द्वापरे तु प्रवर्तन्ते रागो लोभो मदस्तथा।**

**वेदो व्यासैश्चतुर्धा तु व्यस्यते द्वापरादिषु।**[15]

ऋषयः जानन्ति स्म यत् संस्कृतिरस्ति ततो विकृतिरपि आगमिष्यति एव। अतः तस्य संरक्षणार्थं यथाशक्यमुपायमपि ज्ञापितवन्तः। अनन्तरं ऋषिपुत्राणां दृष्टिविभ्रमात् तेषां वेदानां पुनर्विभजनं संजातम्। मन्त्रब्राह्मणानां विन्यासः पृथगभूत। वर्णविपर्ययात् पार्थक्यमागतम्। ऋग्यजुस्साम्नां संहितानां सम्पादनं ऋषिपुत्रैः कृतम्। यथा–

**संहिता ऋग्यजुस्साम्नां संहन्यते मनीषिभिः।**

**सामान्या वैकृताश्चैव द्रष्टृभिस्तैः पृथक् पृथक्।।**

भारतदेशः परम्परायामितिहासे च जीवनस्योत्थानाय सर्वविधप्रवृत्या अन्वेषकः। शास्त्रकाराः एकस्मिन्स्थले विचारयन्ति यत् यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः। त एव अन्यत्र सृष्टेः रहस्यमुद्घाटयन् ब्रह्मसत्यं जगन्मिथ्या इति वदन्ति। जीवनस्य सुखं कस्मिन्क्षेत्रे वर्तते। लौकिकं सौख्यं द्विविधं निर्धारितं शास्त्रकारैः। वस्तुनिष्ठमात्मनिष्ठं च वस्तुनिष्ठं क्षणिकम्, आत्मनिष्ठं स्थिरं सुखम्। आत्मा सर्वत्र वर्तते सर्वेषु समानो वर्तते। अतएव समेषामुत्थानाय सुखलाभाय संस्कृतेः वास्तविकस्वरुपममाचरणीयम्। संस्कृतेः प्राणः धर्मः। धर्म एवास्माकं सम्यक्तया संरक्षणं कर्तुं शक्यः। उक्तमपि

**'न राज्यं न राजाऽऽसीन्न दण्डो न च दाण्डिकः।**

**धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्'।।**

भारतीयायाः संस्कृतेः आदिमं स्वरुपमत्यन्तं विलक्षणमिति नास्ति काचित्विचिकित्सात्र। धर्मस्वरूपविषये उक्तं मनुना यत् –

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**

**एतच्चतुर्विधं प्राहुः साक्षात्धर्मस्य लक्षणम्।**[16]

अनेन वेद ईश्वरस्य साक्षान्निश्वासः। ऋषिभिः लोकजीवनाय परम्परागमनाय परम्परया यदनुभूतं तेषां व्याख्यानं स्मृतिः। ऋषिभिः प्रदत्तायाः तस्याः परम्परायाः स्वकीये व्यवहारे आचारः सदाचारः। तथा च आत्मानः यत्प्रियं तदेव धर्मलक्षणम्। किन्तु एतत्तु शास्त्रलक्षणं पुस्तकेष्वेव वर्तते। अत्र प्रश्नो मस्तिष्के समायाति यत् लोके के सन्ति ये वेदं पठित्वा सदाचारं व्यवहरन्ति अथवा वेदानामध्ययनं धर्मज्ञानाय के कुर्वन्ति। मनोः धर्मविषयकविचारस्यानुपालनं साम्प्रतिके व्यावहारिके युगे प्रायः नैव दृश्यते। वेदानामध्ययनं सदाचारज्ञानाय साम्प्रतिके लोके न भवति। वेदानुकूलमाचरणं दुर्लभम्। ये संस्कृतं पठन्ति ते एव अन्यैः संस्कृतज्ञैः सार्द्धमिर्ष्यां व्यवहरन्ति। संस्कृतज्ञाः जनाः अल्पस्वरेण तानुदाहरन्ति। पण्डिताः दृष्टान्तं प्रस्तुवन्ति यत् स्वानः स्वानं दृष्ट्वा यथा गुर्गुरायते तथैव पण्डिताः पण्डितं दृष्ट्वा। सामान्यतया कश्चिदपि स्वेच्छया वेदानामध्ययनमात्मोन्नत्यर्थं न करोति। संस्कृतमहाविद्यालयेषु विश्वविद्यालयेषु वा यत्र कुत्रापि संस्कृतस्य अध्ययनाध्यापनं भवति तत्रत्याः अध्यापकाः अधिकारिभिः पीडिता एव भवन्ति। संस्कृताध्यापकानां व्यवहारे एवमेव श्रूयते। यत्र कुत्रापि ते मिलन्ति तत्र स्वाधिकारिभिः प्राप्तं दुःखं परस्परं श्रावयन्ति। कश्चिदपि संस्कृतस्य तादृशाः अधिकारिणः दुर्लभाः ये स्वसंस्थानस्य अध्यापकेभ्यः सरलाः स्युः। संस्कृतज्ञानां मध्ये कीदृशी अपसंस्कृतिः विकसिता। परस्परं द्वेषः एव तेषां आचारः। कश्चिदपि वरिष्ठो नेच्छति यत् तस्य अनुज अग्रे गच्छेत् तस्य कृते मार्गं नैव उद्घाटयति यथाशक्यं पिधत्येव व्यवधानं च प्रस्तौति। इदानीं लोके ये छात्राः वेदं संस्कृतेराधारं संस्कृतं पठन्ति तेषां समक्षं सामान्यतया जीविकासाधनमेव दुर्लभम्। अतएव संस्कृतज्ञाः छात्राः श्रद्धाविहीनाः। श्रद्धा ज्ञानस्य परं श्रोतः किन्तु सम्प्रति छात्रेषु गुरूणां प्रति श्रद्धा एव नास्ति। श्रद्धा कीयती आवश्यिकी भगवता कृष्णेनोक्तं गीतायाम्–

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**[17]

गुरव एव ज्ञानस्यादिमानि श्रोतांसि, पाणिनिनाऽपि स्वकीयायां शीक्षायामुक्तं यत् –

**गुरुसुश्रुषया विद्या पुष्कलेन धनेन वा।**

**अथवा विद्यया विद्या चतुर्थो नोपलभ्यते।**[18]

श्रद्धां विना संस्कृतेरनुपालनं कथम्। अतएव धर्मज्ञानाय सदाचारानुपालनाय च वेदानामध्ययनं नैव दृश्यते। जनाः अपि पण्डितं दृष्ट्वा उपहासं कुर्वन्ति। केचिदपि तस्मै पण्डिताय स्वकीयां कन्यां न

दातुमिच्छन्ति। एवं वेदानामध्ययनं धर्मस्य संरक्षणाय तु आवश्यकं किन्तु लोकव्यवहारे तस्य आचारः हास्यास्पदीयः।

स्मृतयः साम्प्रतिके समाजे उपेक्षिताः। सामान्यजीवने येषां सिद्धान्तानामुल्लेखो विभिन्नासु स्मृतिषु वर्तते तेषां तथैवाचरणं दुष्करमित्यनुभवन्ति लौकिकाः विविधसंस्काराणमनौचित्यं प्रदर्शयन्ति। दुश्प्रचारमपि कुर्वन्ति, गदन्ति जनाः यत् स्मृतयः समाजस्य जातिविधं विभाजनं प्रस्तुवन्ति। केवलं ब्राह्मणानामुपकारकाः अतएवोपेक्षणीयाः ताः। अस्माकं संस्कृतौ तादृश्यो विकृतयः सम्मिलिताः यस्मात् संस्कृतिः मूलमतिक्रम्य काचिन्नवीना विचित्रा संस्कृतिः समायाता। यस्याः नामकरणं पारम्परिकाः अपसंस्कृतिः पाश्चात्या नाम्ना वा कुर्वन्ति। धर्मस्य तृतीयं लक्षणं लुप्तम्। आचारः स्वार्थयुक्तः। यथा आवश्यकं भवति जनाः तथैवाचरन्ति कः कीदृशमाचारं व्यवहरेदिति नैव चिन्तयन्ति। वराणां दृष्टौ युवानः अचिन्तकाः संस्कृतिविषये। तेषामाचार एव गृहस्थधर्मस्याधारः। किन्तु अस्माकं देशे अधिकाः जरायुक्ताः पूर्वजाः संस्कृतिविमुक्तैः संस्कारहीनैः पुत्रैः पीडिताः दृश्यन्ते। यद्यपि आचारहीनानां कृते उक्तवन्तः ऋषयो यत् 'आचारहीनं न पुनन्ति वेदाः' तथापि जनाः एतादृशानां वाक्यानां स्मरणमेव न कुर्वन्ति।

साम्प्रतिके युगे प्राच्यप्रतीच्यदर्शनानां मध्ये वैषम्यं सर्वत्र सिद्धमिति नास्ति काचित्विचिकित्सा तथापि प्राचीनार्वाचीनयोर्मध्ये तस्मिन्वैषम्येऽपि केचन समन्वयात्मकाः सूत्रसंपृक्ताः रहस्या अनुस्यूताश्च वर्तन्ते। प्रत्येकस्य धर्मस्य संस्कृतेर्वा निश्चितः सिद्धान्तो विद्वद्भिः स्वीकृतो प्रतिपादितश्च। सामान्यरुपेण समेषां सिद्धान्तानां दर्शनानां वा मानवोत्थानमेव परं लक्ष्यम्। भारतीयाः भवन्तु वा पाश्चात्याः सर्वे दार्शनिकाः जीवानां कल्याणमेव यच्छन्ति। यस्मिन्धर्मे यस्मिन्काले भ्रान्तयः दुर्भावनाः प्रविष्टाः तमिस्न्नेव काले धर्मस्य वास्तविकस्वरूपे परिवर्तनमस्माभिर्दृश्यते। परिवर्तनक्रमेणैव संस्कृतेर्मूलस्वरूपस्य विखण्डनं भवति। मानवकल्याणस्य या काऽपि भावना संस्कृतेर्मूलमन्त्रो भवति सा नष्टायते। विकृतयः सर्वव्यापकाः भवन्ति। समेषां संयोजने संचालने च भारतीयासंस्कृतिरेव समर्था इत्यपि वदन्ति सर्वत्र मानवाः। भारतीया संस्कृतिरेव सर्वेषां पुरातनी सनातनी शाश्वती संस्कृतिः। विश्वसंस्कृतौ भारतीयसंस्कृतेरध्यात्मक्षेत्रं सर्वोत्कृष्टम्। सर्वे मुक्तकण्ठैरध्यात्मज्ञानमभिनन्दन्ति। साम्प्रतिको युग उपभोक्तावादीति कथ्यते। उपभोक्तावादसंस्कृतौ परस्पर– समन्वयस्य परोपकारस्य भावनायाः सर्वत्राभावो दृश्यते। सर्वे स्वसुखसामर्थ्यवर्धनायान्येषां धनं येन केन प्रकारेण स्वीकर्तुं सप्रयत्नाः भवन्ति। अधिकाधिकजनाः परपीडां नानुभवन्ति। अन्यान् सायासेन दुःखं प्रददति। प्रतिवेशिनो प्रतिवेशिनं दृष्ट्वा ईर्ष्यन्ति। अन्येन प्रतिवेशिना सार्द्धमन्यस्य प्रतिवेशिनः निन्दां प्रसारयति। द्वेषभावनायाः उत्कर्षं स्थापयन्ति। प्रतिवेशिनां कृते अशान्तिं सप्रयत्नेन कल्पयन्ति यथाशक्यां हानिमुत्पादयन्ति। एतादृशे अधोगतिगम्यमाने विकृतकलिकाले अस्माकं सनातनी संस्कृतिः संकटापन्ना दृश्यते। यस्मिन्देशे 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग्भवेदिति सिद्धान्तवाक्यमासीत् मानवानां तस्मिन्नेव देशे कश्चिदपि कार्यालयः तादृशो न दृश्यते यत्रोत्कोचं विना कार्यं सरलतया सम्पन्नं भवेत्। कस्यचिदपि देशस्य शिक्षैव आधारभूतव्यवस्था भवति, शिक्षयैव संस्कृतेः

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

संरक्षणं भवितुमर्हति किन्तु दौर्भाग्यादस्माकं देशस्य शिक्षणव्यवस्था लक्ष्यहीना संस्कृतिविहीना च प्रतिभाति। चिन्तयन्तु यस्मिन्देशे –

**भद्रं कर्णेभिः श्रुणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः।**

**स्थिरैरंगैस्तुष्टुवांसस्तनुभिर्व्यशेमहि देवहितं यदाहुः।।**[19]

इति कल्पनमासीत्किन्त्वस्यां साम्प्रतिक्यां व्यवस्थायां संस्कृतिं प्रति कश्चिदपि गम्भीरो न दृश्यते। संस्काराः विलुप्ताः, संस्कारहीनाः अधिकाः दृश्यन्ते संस्कारविषये जनाः परिहासं कुर्वन्ति। संस्काराणामभावादग्रिमाः वंशजाः लक्ष्यहीनाः भवन्ति तेषां समक्षं लौकिकं लक्ष्यमेव परं दृश्यते। पारमिकं नैव चिन्तयन्ति। संस्काराभावादेव विश्वासस्य परमाभावो आगतः। पुरातनं प्रति विश्वासमेव नैव चिन्तयन्ति नवीनाः। ते सन्नद्धा एव न सन्ति यत् तेषां कृते पूर्वजाः कल्याणं कल्पयन्ति। नवीनाः आधुनिकाः पूर्वजानां कृते मूर्खा एवेति वदन्ति। तेषामुपरि अविश्वासः संस्कृतेः महद्धानिः। अतएवोत्तरोत्तरं महान्तमवांछनीयं गर्तं गच्छन्ति। यद्यपि वैज्ञानिकदृष्ट्या संस्काराः मानसिकबलमुत्पादयन्ति तथापि तान्त्यजन्ति जनाः। भारतीयसंस्कृतौ परम्परायां यद्विज्ञानमासीत् तस्य ज्ञानमेव लुप्तमेतस्मात् संस्कृतेर्यत्रहस्यमासीत् तत् पाखण्डरूपेण लोके व्यावृतम्। एतस्मिन्सन्दर्भे एकमुदाहरणं दर्शनीयम्। दीर्घकालं यावत् अश्वत्थवृक्षस्याधः जलमवस्यमेव पातनीयमित्यस्माकं परम्परायामतीवप्राचीना संस्कृतिः। अस्माकं पूर्वतना उक्तवन्तो यदश्वत्थवृक्षे वासुदेवस्य निवासो भवति, तस्य पानार्थं संरक्षणार्थं च जलमवश्यमेव दातव्यम्। कालान्तरे क्रमेणाधुनिकाः प्रक्षेपं कृतवन्तो यत् वृक्षे देवानां वासः कथं भवितुमर्हति। एषो पाखण्डो वृक्षे कश्चिदपि देवो न स्थातुं शक्नोति अतएव अश्वत्थस्य वृक्षे जलदानात् किमपि न भवति। साम्प्रतिके युगे वैज्ञानिकाः एतस्याः परम्परायाः रहस्यं ज्ञातुमनुसंधानं कृतवन्तः। तेषामनुसंधानेन रहस्यमेतदायातं यदश्वत्थस्य वृक्षः सर्वेषु वृक्षेषु सर्वाधिकवायुप्रदायकः। तस्य यावत्यः शाखाः वियति भवति तावन्त एव तस्य मूलं पृथिव्यां भवति एष अश्वत्थः दिने रात्रौ च सर्वदा वायुप्रदायकः प्रदूषणशोषकश्च। यस्मादस्माकं जीवनरक्षणं भवति। साम्प्रतिके युगे जनाः वैज्ञानिकरहस्यं ज्ञातवन्तः किन्तु तस्य संरक्षणार्थं निष्प्रयत्नाः सन्ति। प्राचीनकाले धर्माश्रये जनाः अश्वत्थस्य संरक्षणार्थं निरन्तरं सप्रयत्नाः आसन्। एवं या धर्माश्रिता संस्कृतिः सैव प्रकृतिसंरक्षिका भवति। विज्ञानाश्रिता या संस्कृतिः सा प्रकृतिविरोधिका इति स्पष्टम्।

वैदिकी संस्कृतिः सर्वदा सर्वैरभिनन्दनीया। पश्यताम् वैदिकीं संस्कृतिम्–

**मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।**

**सम्यंचः सव्रता भूत्वा वाचं वदत भद्रया।।**[20]

वेद अस्माकं संस्कृतेराधारः। भ्राता भ्रात्रा सार्द्धं द्वेषं मा कुर्यात् किन्तु दुर्भाग्यमस्माकं कस्मिन्काले वयं जीवामः प्रायः समाचारपत्रेषु दूरदर्शनेषु वा एतादृशान् समाचारान्वयं श्रुणुमः यत् भ्राता भ्रातरं

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

भुशुण्डिना सम्पत्तिविवादात् हतवान्। पुत्रः स्वसुखसामर्थ्यसंवर्धनाय पितरं पीडयति पितृजनैः साकमुपेक्षां व्यवहरति। पश्यतां संस्कृतेराधारं मन्त्रम्–

**अनुव्रतः पितुः पुत्रो मात्रा भवति संयतः।**

**जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।।**[21]

पुत्रः सर्वदा पितरमनुचरेत् किन्तु यान्त्रिकेऽस्मिन्युगे आत्मनि संवेदना एव नास्ति। अधिकांशाः पितरः स्वपुत्रैः दुःखिता एव श्रूयन्ते। स्मरन्तु अस्माकं पूर्वतनाः प्रायः धनहीना एव आसन्। अध्ययनस्य सम्यक्व्यवस्था समाजे न आसीत्। अस्माकं पितरः पितामहाः वा धनाभावात् गृहात् बहिर्गत्वा विद्यालयेषु येन केन प्रकारेण अध्ययनं कृतवन्तः। गृहेषु कश्चिज्ज्येष्ठभ्राता स्वमनुजं पुत्रं मत्वा तस्याध्ययनस्य विद्योपार्जनस्य व्यवस्थां करोति स्म। धनाभावेऽपि स ज्येष्ठः भ्रातुः कृते येन केन प्रकारेण धनव्यवस्थां कृत्वा अध्ययनं सम्पादयति स्म। अध्ययनानन्तरं पुनः सर्वकारसेवाप्राप्तः अनुजोऽपि ज्येष्ठं भ्रातरं प्रति सम्मानं तस्य संरक्षणं च अर्पयति स्म इति वयमपि दृष्टवन्तः किन्तु परिवर्तमाने गम्यमाने कालेऽस्मिन् पितरः स्वपुत्राणामध्ययनाय कोषागारात् सर्वविधमधमर्णतां स्वीकुर्वन्ति। पुत्रेभ्यः स्वकीयं सर्वं सुखं समर्पयन्ति। यत् ते पुत्राः सुखिनो भवन्तु कुतोऽपि दुःखमभावो वा मा भवेत्। येन केन प्रकारेण सर्वविधं सौजन्यं समुपस्थापयन्ति। जीवनस्य काठिन्येनार्जितं धनं तेषां पालने पोषणे अध्ययने च समर्पयन्ति किन्तु पुत्राः यदा युवानो भवन्ति सेवायां गच्छन्ति तदा पूर्वजं प्रति उपेक्षां व्यवहरन्ति। अनेके पितरः मातरो प्रायः लोकमर्यादया स्वपुत्राणामुपेक्षामन्यैः सार्द्धं न प्रसारयन्ति। पुत्रैः प्राप्तानां दुःखानामादानं प्रदानं वा नैव कुर्वन्ति। केवलं स्वयमेव दैवमतिं मत्वा भुंजन्ति। एतद् कदापि न वक्तुमिहे यत् सर्वे पुत्राः एतादृशाः सन्ति किन्तु अधिकाः वृद्धजनाः एतादृशानां पीडानामनुभवं प्रकटयन्ति अस्माभिः सार्द्धम्। कुत्र गतः शास्त्रसूक्तीनां प्रभावो भारतीयसंस्कृतेर्नीतेरनुपालनं कुत्र लुप्तम्–

**'अभिवादनशीलस्य नित्यवृद्धोपसेविनः।**

**चत्वारो तस्य वर्द्धन्ते आयुर्विद्यायशोबलम्'।**

इत्यादीनां सूक्तीनां प्रभावः कुत्र लुप्तः। मध्यकालिकाः संस्कृतिसंरक्षका ऐतिहासिकाः वर्णयन्ति यदस्माकं देशः दीर्घकालं यावत् पराधीनः आसीत्। मध्यकाले ये अस्माकं शासकाः आसन् तेषां भिन्ना संस्कृतिः आसीत्। सा प्रायः अध्यात्माश्रिता नैवासीत्। तस्मादस्माकं संस्कृतेः परम्परया सह तेषां मेलनमस्वाभाविकमासीत्। अनन्तरं ते बलादेवास्माकमुपरि स्वकीयां संस्कृतिमारोपितवन्तः। फलस्वरूपमस्माकं संस्कृतेः स्वरूपं परिवर्तितम्। तेषां प्रभावादस्मासु अपसंस्कृतिः समागता। वैदेषिकाः परस्परं आक्रमणं कृत्वा अहिंसावादिनं प्रति हिंसामारोपितवन्तः। अनन्तरं यादृशं तेषामाचरणमासीत् तत्सर्वं समागतमस्मासु। अस्माकं संस्कृतौ संस्कृतभाषायामपशब्दाः एव न सन्ति, मनसि दुर्विचाराः नैव आयान्ति स्म। अहो कीदृशं चिन्तनमासीदस्माकं ऋषीणां चिन्तयन्तु–

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

**जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम्।**

**ममेदह कतावसो मम चित्तमुपायसि।।**[22]

पुनः कथयन्ति– भद्रमिच्छन्त ऋषयः स्वर्विदस्पतो दीक्षामुपसेदुरग्रे। ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसं नमन्तु।। धर्मस्य आचार अस्माकं व्यवहारे कथं आवृतो तदपि दर्शनीयः– धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः। तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत। धर्मेण हन्यते व्याधिर्धर्मेण हन्यते ग्रहः। धर्मेण हन्यते शत्रु यतो धर्मस्ततो जयः। एषा अस्माकं संस्कृतिः। धर्ममयमेव वातावरणमासीत्। संस्कृतेराधारो धर्मः। संस्कृतेर्प्राणो धर्मः। धर्मं यो बाधते धर्मो न स धर्मः कुधर्म तत्। अविरोधी तु यो धर्मः स धर्मः सत्यविक्रमः।

जनाः कथनार्थं सम्बन्धिनः नैकट्यं प्रदर्शयन्ति किन्तु यस्मिन्कस्मिन्नवसरे उपस्थिताः भवन्ति तदा परस्परं निन्दामेव चर्चयन्ति। सहयोगं नैव कुर्वन्ति। स्वकीयामुन्नतिं स्थापयन्ति। दुर्भाग्यमिदं यत् ते कथनार्थे रक्तसम्बन्धिनः व्यवहारे ईर्ष्याद्वेषिणः। अस्माकमाधुनिक्यां जीवनशैल्यां चरित्रबलमेव नास्ति। चरित्रबलमेव सर्वाधिकं महत्वपूर्णं बलं तेनैव समाजः श्रेष्ठो भवति स्मृतयः एतदेवोपदिशन्ति–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।** [23]

किन्तु स्वकीयं चरित्रं केचिदपि नैव पश्यन्ति स्वकीयेन व्यवहारेण चरित्रेण वा उदाहरणं नैव प्रस्तुवन्ति। अस्माकं वेशधारणं परिवर्तितमशनं विकृतम्। संरूक्तपरिवारस्य रहस्यमद्यतनाः नैव जानन्ति। संयुक्तपरिवारस्य महत्वं कियदासीत् तत् पूर्वतनाः जानन्ति। एकाकीजीवनमेव साम्प्रतिकजीवनशैली समाजे गम्यमाना दृश्यते। परस्परं सहयोगभावना विलुप्ता। भर्तृहरिणा यदुक्तं तत्

**आहारनिद्राभयमैथुनंच समानमेतत् पशुभिर्नराणाम्।**

**धर्मो हि तेषामधिको विशेषोधर्मेणहीनाः पशुभिः समानाः।।**[24]

श्लोकस्यास्य महत्वं न जानन्ति जनाः। अतएव पशुवदेव जीवनं क्रमेण मनुष्याणां गम्यमानम्। उक्तमपि धर्मेणहीनाः पशुभिः समाना। अस्माकं संस्कृतिः बहु परिवर्तिता विकृता च। अग्रे किं भविष्यति अस्य कल्पना एव न कर्तुं शक्यते। अतएव पारम्परिकाः संस्कृतिसंरक्षकाः वदन्ति ईश्वरः एव जानाति। तस्य संरक्षणे एव सर्वं जगत् गम्यमानं वर्तते। स एव समर्थः यत्किमपि अग्रे भविष्यति तत्सर्वं स एव सम्पादयिष्यति मनुष्याणां हस्ते किमपि नास्ति। अतः संस्कृतेः संरक्षणार्थं स्वकीये चरित्रे तेषामनुपालनमावश्यकमिति।

।। इतिशम्।।

ISSN- 2454-2695
Volume 03 Issue 08
August 2017

साहित्य संहिता

Available at http://www.sahityasamhita.org/

## सन्दर्भसूच्यः–

1. अथर्ववेद 1.34.03
2. ऋ.10.191.2
3. ऋ.10.191.4
4. अथर्ववेद
5. (अ.19.09.02)
6. कर्मठगुरु
7. लिंगमहापुराण (39.06)
8. लिंगमहापुराण (39.07)
9. लिंगमहापुराण (39.13)
10. लिंगमहापुराण (39.14)
11. लिंगमहापुराण (39.53)
12. लिंगमहापुराण (39.54)
13. लिंगमहापुराण (39.55)
14. लिंगमहापुराण (39.57)
15. लिंगमहापुराण (39.56)
16. (मनु. 2.12)
17. गीता 4.39
18. पाणिनीयशीक्षा
19. यजुर्वेद 25.21
20. ऋग्वेद 20.3.30
21. अथर्ववेद 3.30.02
22. अथर्ववेद
23. मनुस्मृति 02.20
24. नीतिशतक